| पूर्व पृष्ठ अंक योग | + | वर्तमान पृष्ठ प्राप्तांक | = | इस पृष्ठ के अंकों का योग |
|---|---|---|---|---|
| | | | | |

| संस्कृत/ Sanskrit 24-25/B-10 -1 | वेद भूषण पञ्चम वर्ष परीक्षा / Veda Bhushan Fifth Year Examination कक्षा 10वीं / पूर्व मध्यमा - II/Class 10th/Purva Madhyama - II | SET - A |
|---|---|---|

**प्रश्न पत्र संख्या** / Que. Paper No. : V/24-25/ B-10-1/

**विषय** /Subject - **संस्कृत** / Sanskrit

**पूर्णांक** / Max. Marks - 100 **समय** / Time - 3 **घंटा**/3 Hours

## खण्ड क

## (अपठितावबोधनम् - 20 अङ्काः)

**प्र.1. अधोलिखितम् अपठितगद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत —**

दाक्षिणात्ये जनपदे महिलारोप्यं नाम नगरम् आसीत्। तस्य समीपे एकः महान् वटवृक्षः आसीत् । तत्र चित्रग्रीवः नामकः कपोतराजः सकुटुम्बः निवसति स्म। एकदा जालतण्डुलहस्तः एकः व्याधः तत्र आगच्छत् । वृक्षस्य अधः जालं प्रासारयत् । उपरि च तण्डुलान् अक्षिपत् । ततः दूरं गत्वा निभृतः स्थितः। ततः कपोतशावकाः तण्डुलान् दृष्टवन्तः । तान् भक्षयितुम् उद्यताः कपोतशावकाः जाले एव बद्धाः अभवन् । ते सर्वे जालात् बहिः आगन्तुं जालस्य भेदनाय च परिश्रमम् अकुर्वन् । तदा चित्रग्रीवः तान् अवदत् - "अहो न भेदितव्यम्। यूयं सर्वे मिलित्वा पाशं नीत्वा उत्पतत ।" तदा सपाशजालाः कपोताः उदपतन् । तस्य वनस्य एकस्मिन् भूभागे चित्रग्रीवस्य सुहृद् हिरण्यकः अवसत् । चित्रग्रीवः कपोतैः सह तस्य बिलसमीपे अवातरत्। हिरण्यकः पाशम् अकृन्तत् । एवं ते कपोताः पुनः मुक्ताः ।

1. **एकपदेन उत्तरत -** $1 \times 5 = 5$

अ. नगरस्य नाम किम् ?

---

आ. कपोतराजस्य नाम किम् ?

---

इ. चित्रग्रीवस्य सुहृद् कः आसीत् ?

---

ई. कः पाशम् अकृन्तत् ?

---

ऋ. के पुनः मुक्ताः ?

---

2. **पूर्ण वाक्येन उत्तरत -** $2 \times 5 = 10$

क. चित्रग्रीवः तान् किम् अवदत् ?

---

---

ख. एकः महान् वटवृक्षः कुत्र आसीत् ?

---

---

ग. के तण्डुलान् दृष्टवन्तः ?

---

---

घ. के बिलसमीपे अवातरन् ?

---

---

ङ. ते सर्वे किमर्थं परिश्रमम् अकुर्वन् ?

---

---

3. **अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत। (द्वित्रिशब्दात्मक-वाक्यम्)** 1

---

---

**4. निर्देशानुसारं उत्तरत। (केचन चत्वारः)** $1 \times 4 = 4$

क. 'तान् भक्षयितुम् उद्यताः कपोतशावकाः जाले एव बद्धाः अभवन्' अस्मिन् वाक्ये 'अभवन्' इति क्रियापदस्य कर्तृपदं किम्?

क) कपोतशावकाः   ख) जले   ग) बद्धाः   घ) भक्षयितुम्

------------------------------------------------------------

ख. 'एकदा जालतण्डुलहस्तः एकः व्याधः तत्र आगतः' अस्मिन् वाक्ये 'जालतण्डुलहस्तः' इति पदस्य विशेष्यपदं किम्?

क) एकः   ख) व्याधः   ग) तत्र   घ) आगतः

------------------------------------------------------------

ग. 'निषादः' इत्यर्थे किं पदम् अनुच्छेदे प्रयुक्तम्?

क) कपोताः   ख) सकुटुम्बः   ग) मिलित्वा   घ) व्याधः

------------------------------------------------------------

घ. 'उपरि' इति पदस्य किं विलोमपदम् अनुच्छेदे प्रयुक्तम्?

क) एकदा   ख) अधः   ग) दृष्ट्वा   घ) मुक्ताः

------------------------------------------------------------

## खण्ड ख

## (रचनात्मककार्यम् - 15 अङ्काः)

**प्र.2. अधः चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां साहाय्येन पञ्च वाक्यानि संस्कृतेन लिखत।** $1 \times 5 = 5$

(मञ्जूषा - उद्यानम्, बालः, खेलतः, बाला, करोति, पश्यति, वृक्षः, चित्रम्, रचयति, उपविशति, दोलायाम्, पादकन्दुकेन)



--------------------------------------------------------------------------------

--------------------------------------------------------------------------------

--------------------------------------------------------------------------------

--------------------------------------------------------------------------------

--------------------------------------------------------------------------------

--------------------------------------------------------------------------------

**प्र.3. अधोलिखितानि वाक्यानि संस्कृतभाषया अनूद्य लिखत -** 1 × 5 = 5

क. संस्कृत देवभाषा है । / Sanskrit is a dev language.

--------------------------------------------------------------------------------

--------------------------------------------------------------------------------

ख. यह भाषा सभी भाषाओं की जननी है ।/This language is the mother of all languages.

--------------------------------------------------------------------------------

--------------------------------------------------------------------------------

ग. इस भाषा में अनेक ग्रन्थ हैं । / There are many texts in this language.

--------------------------------------------------------------------------------

--------------------------------------------------------------------------------

घ. मोहन राम से सुन्दर है । / Mohan is beautiful then Ram.

--------------------------------------------------------------------------------

--------------------------------------------------------------------------------

ङ. बालक को दौड़ना नहीं चाहिए । / Boy must not have run.

--------------------------------------------------------------------------------

--------------------------------------------------------------------------------

| पूर्व पृष्ठ अंक योग | + | वर्तमान पृष्ठ प्राप्तांक | = | इस पृष्ठ के अंकों का योग |
|---|---|---|---|---|
| | | | | |



**प्र.4.** **स्वविद्यालयस्य प्रधानाचार्याय दिनद्वयस्य रुग्णतावकाशार्थं प्रार्थनापत्रं लिखत ।** $1 \times 5 = 5$

## खण्ड - ग

### (अनुप्रयुक्त व्याकरणम् - 25 अङ्काः)

**प्र.5. अधोलिखितपदानां विग्रहवाक्यपूर्वकं समासं निर्दिशत ।** $1 \times 5 = 5$

| | | विग्रहः | समासनाम |
|---|---|---|---|
| क. | उद्दालकपुत्रः | ........................... | ........................................................ |
| ख. | यज्ञदक्षिणा | ........................... | ........................................................ |
| ग. | प्राचीनकालः | ........................... | ........................................................ |
| घ. | अनुरथम् | ........................... | ........................................................ |
| ङ. | अधिहरि | ........................... | ........................................................ |

**प्र.6. अधोलिखितपदानां लिङ्ग-विभक्ति-वचनानि लिखत ।** $1 \times 5 = 5$

| | | लिङ्गम् | विभक्तिः | वचनानि |
|---|---|---|---|---|
| क. | चन्द्रमाः | ........................... | ........................... | ........................... |
| ख. | मातृन् | ........................... | ........................... | ........................... |
| ग. | तस्यै | ........................... | ........................... | ........................... |
| घ. | पन्थानः | ........................... | ........................... | ........................... |
| ङ. | देवानाम् | ........................... | ........................... | ........................... |

**प्र.7. अधोलिखितपदानां प्रकृतिप्रत्ययौ विभजत । $1 \times 5 = 5$**

| | | प्रकृतिः | प्रत्ययः |
|---|---|---|---|
| क. | गुणवान् | ........................... | ........................................................... |
| ख. | कर्तव्यम् | ........................... | ........................................................... |
| ग. | हर्तुम् | ........................... | ........................................................... |
| घ. | पठितवान् | ........................... | ........................................................... |
| ङ. | खादितव्यम् | ........................... | ........................................................... |

**प्र.8. सत्यम् / असत्यम् इति चिनुत । $1 \times 5 = 5$**

क. बहूनि महाकाव्यानि सन्ति । ...........................

ख. सम्बोधने द्वितीया स्यात् । ...........................

ग. गां दोग्धि पयम् । ...........................

घ. रामः यदुवंशे जातः । ...........................

ङ. अमरकोषे त्रीणि काण्डानि सन्ति । ...........................

**प्र.9. अधोलिखितसमुचितशब्दमेलनं कुरूत । $1 \times 5 = 5$**

| | | |
|---|---|---|
| क. | आत्मवर्णनम् | कारकाणि |
| ख. | दशसहस्रशब्दाः | गीतायाम् |
| ग. | शिक्षेरन् | अमरकोषग्रन्थे |
| घ. | कालिदासः | शिक्षयेयुः |
| ङ. | षट् | रघुवंशमहाकाव्यम् |

## खण्डः - घ

## (पठितावबोधनम् - 40 अङ्काः)

**प्र.10. अधोदत्तान् श्लोकान् पठित्वा प्रश्नानां समाधानानि लिखन्तु ।** $2 \times 5 = 10$

हिताहितं सुखं दुःखमायुस्तस्य हिताहितम् ।
मानं च तच्च यत्रोक्तमायुर्वेदः स उच्यते ॥१॥

आदित्यस्य नमस्कारान् ये कुर्वन्ति दिने दिने ।
आयुः प्रज्ञा बलं वीर्यं तेजस्तेषां च जायते ॥२॥

उद्योगिनं पुरुषसिंहमुपैति लक्ष्मीर्दैवेन देयमिति कापुरुषा वदन्ति ।
दैवं निहत्य कुरु पौरुषमात्मशक्त्या यत्ने कृते यदि न सिध्यति कोऽत्र दोषः ॥३॥

रे रे चातक ! सावधानमनसा मित्र ! क्षणं श्रूयताम्, अम्भोदा बहवो हि सन्ति गगने सर्वेऽपि नैतादृशाः ।
केचिद् वृष्टिभिरार्द्रयन्ति धरणीं गर्जन्ति केचिद् वृथा, यं यं पश्यसि तस्य तस्य पुरतः मा ब्रूहि दीनं वचः ॥

1. कः आयुर्वेदः उच्यते ?

------------------------------------------------------------------------

------------------------------------------------------------------------

2. आदित्यस्य नमस्कारात् किं भवति ?

------------------------------------------------------------------------

------------------------------------------------------------------------

3. दैवं निहत्य किं कर्तव्यम् ?

------------------------------------------------------------------------

------------------------------------------------------------------------

4. के वृष्टिभिः धरणीम् आर्द्रयन्ति ?

------------------------------------------------------------

------------------------------------------------------------

5. यं यं पश्यसि तस्य तस्य पुरतः किं न कर्तव्यम् ?

------------------------------------------------------------

------------------------------------------------------------

**प्र.11. अधोलिखितप्रश्नानाम् उत्तरं 25-30 शब्दैः उत्तरत ।** 2 × 5 = 10

1. दुःखं कतिविधं ? के च ते ?

------------------------------------------------------------

------------------------------------------------------------

2. के मन्त्रद्रष्टारः ?

------------------------------------------------------------

------------------------------------------------------------

3. हिताशी स्यात् ................. पूरयत ।

------------------------------------------------------------

------------------------------------------------------------

4. लकाराः कति ? के च ते ?

------------------------------------------------------------

------------------------------------------------------------

5. उद्दालकस्य पुत्रस्य नाम किम् ?

--------------------------------------------------------------------------------

--------------------------------------------------------------------------------

**प्र.12. अधोलिखितप्रश्नानाम् उत्तरं 40-50 शब्दैः उत्तरत ।** 3 × 4 = 12

1. "अभीवर्तेन मणिना ............ राष्ट्राय वर्धय" इति मन्त्रं पूरयित्वा तात्पर्यं स्पष्टयत ।

--------------------------------------------------------------------------------

--------------------------------------------------------------------------------

--------------------------------------------------------------------------------

--------------------------------------------------------------------------------

2. शिवराजः कीदृशीं प्रतिज्ञामकरोत् ?

--------------------------------------------------------------------------------

--------------------------------------------------------------------------------

--------------------------------------------------------------------------------

--------------------------------------------------------------------------------

3. महाकविः कालिदासस्य कति नाटकानि सन्ति ? के च ते ?

--------------------------------------------------------------------------------

--------------------------------------------------------------------------------

--------------------------------------------------------------------------------

--------------------------------------------------------------------------------

4. नचिकेताः किमर्थं यमलोकम् अगच्छत् ? वर्णयत ।

---------------------------------------------------------------------------------------------------

---------------------------------------------------------------------------------------------------

---------------------------------------------------------------------------------------------------

---------------------------------------------------------------------------------------------------

**प्र.13. अधोलिखितप्रश्नानाम् उत्तरं 120-150 शब्दैः उत्तरत ।** 4 × 2 = 8

अ. राष्ट्राभिवर्धनसूक्तं वर्णयत ।

**अथवा**

नचिकेताः कति वरान् यमात् प्राप्तवान् ? यथाक्रमं तान् वर्णयत ।

---------------------------------------------------------------------------------------------------

---------------------------------------------------------------------------------------------------

---------------------------------------------------------------------------------------------------

---------------------------------------------------------------------------------------------------

---------------------------------------------------------------------------------------------------

---------------------------------------------------------------------------------------------------

---------------------------------------------------------------------------------------------------

---------------------------------------------------------------------------------------------------

---------------------------------------------------------------------------------------------------

---------------------------------------------------------------------------------------------------

---------------------------------------------------------------------------------------------------

आ. लट्-लङ्-लृट्-लोट्-लेट्-लकाराः कस्मिन्नर्थे भवन्ति ? सोदाहरणं लिखत ?